नं० ६७६-घ 22

गुणमञ्जरी प्रायश्चित्तप्रकरणम्

(धर्मशास्त्रे)

नं० ६७६-घ

(सम्पूर्णम्)

पत्राणि २२

नं० ६७६-घ

गुणमञ्जरी प्रायश्चित्तप्रकरणम्

पत्राणि २२ (धर्मशास्त्रम्)

(सम्पूर्णम्)

मि० १

श्रीगणेशाय नमः ॥ नमो शम्भ्वाख्यासि प्रकृतिरविमिति तां तिथौ ते मुक्तादैवेर्क्षे हरिहर । एभिर्वर्चिप्रभृतिभिः ॥ अतोत्र मितमेतत्प्रणु
जननिरीनातुरस्त्यापयामेतैर्वैः सेचरणाद्यालान्वोपरमति ॥ १ ॥ पराशरमुनिः प्रोढविचारस्वनिनिस्तान ॥ प्राप्यार्थेरलान
तन्मालाकृताकृष्ण्यालेपिता ॥ २ ॥ तत्रप्रायश्चित्तस्य निरूपणीयत्वाहृत निरूपणीयस्यावस्य कृत्वेनादौतदंगभूतानधर्मानाह
ब्रह्मचर्यं दयाक्षान्तिर्दानं सत्यमकल्कता ॥ अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः ॥ स्नानमौनोपवासेज्यास्वाध्यायोप-
स्थनिग्रहाः नियमाः गुरुशुश्रूषा शौचाक्रोधाप्रमादता ॥ अकल्कता अकुटिलता ॥ सांतपनाख्य व्रतमाह । अष्टमाषपरि
मितं गोमूत्रं षोडशमाषपरिमितं गोमयं द्वादशमाषपरिमितं क्षीरं दशमाषपरिमितं दध्यष्टमाषाज्यं घृतसमं चतुरकुशोदकसं रा० १
मिता वर्णसंख्याकाः तत्र रक्तश्वेतपीतनीलकृष्णवर्णानां गवां एतत्पंचकमलाभे सर्वं कापिलमेवैतत्र पूर्वेस्मिन्नहनि पंचगव्यमात्रं प्र
मन्त्रवर्जं त्वा परेह्नि उपवासेन पूर्वेद्युः पोष्यापरेद्युः समंत्रकं पंचगव्यं पीत्वा ते तदा ब्रह्मकूर्चमारभ्यते ॥ तन्मन्त्रास्तु गायत्र्या गोम
त्रस्य गंधद्वारेति गोमयस्य आप्यायस्वेति क्षीरस्य दधिक्राव्णेति दध्नः । तेजोसि शुक्रमित्याज्यस्य मातिः पूतं पंचगव्यमस्मो सस परोरधिन्ना

ऐरस्मै टिएावतीइदं विष्णुर्मानस्तोके शंवती रिति चतुर्भिर्हं त्वा तच्छेषं प्रणवेनालोड्य पलाशत्रिपत्रमध्यपत्रेण पद्मेन स्वर्णरौप्यपा
त्रेणाब्रह्मनत्तोथैणा वापिबेत् ॥ पक्षात्त्रिरात्रपंचगव्यपीयते तदापतिसांतपनं भवतीसंवर्तः ॥ जाबालः ॥ त्र्येकैकं प्रत्यहं पापनेनैकस्मि
न्नहन्युपवासेन सप्ताहसाध्यमेतदित्याह ॥ तत्र यात्तिपेक्षया व्यवस्थेति न विरोधः ॥ यमस्तु त्र्यहं गोमूत्रेण त्र्यहं गोमयेन त्र्यहं दध्ना त्र्य
हं क्षीरेण सर्पिषेति पंचदशाहः साध्यमपशे महासांतपनमाह ॥ केचित्तु त्र्यहं कुशोदके त्र्यहमुपवासेनेत्येतदाप्य कैकैकविंशति
हेवसस्साध्यमेतदाहुः ॥ पराशरः पंचगव्यानामेकैकस्य द्व्यहमुपपो ॥ त्तदातिसांतपनं ॥ ॥ पर्णकृच्छ्रमाह ॥ पलाशोदुंबरारविंदश्रीवृ
क्षपत्राणां प्रत्येकमेन क्वथितमुदकं चतुर्थमहस्सु पीत्वा पंचमेऽह्नि उपवासेनैतत्प्रभवति ॥ तान्येकीकृत्य क्वाथयित्वा त्रिदिनान्ते यावकेन प
र्णकृच्छ्रं भवति ॥ मासं बिल्वादिफलभक्षणेन फलकृच्छ्रं पत्रभक्षणेन पत्रकृच्छ्रं पुष्पभक्षणेन पुष्पकृच्छ्रं मततनभक्षणेन तत्तत्कृच्छ्रमि
त्यादिबोध्यं ॥ तप्तकृच्छ्रमाह ॥ दुग्धघृतोदकानां तप्तानामेकाहि त्रिपलप्रमाणानामेकैकं प्रत्यहं पीत्वा परेऽह्नि उपवासेन चतुर्भिरहो
भिरेतद्भवति ॥ पादकृच्छ्रमाह ॥ प्रत्येकं ग्रासं षड्विंशतिग्रासान् त्र्यहं नक्ते द्वादशग्रासान् त्र्यहं कृतेऽप्ययाचितान् चतुर्विंशतिग्रासान्

मि० वापस्तत्त्र्यहमनशनेनत्र्यातमेसहनुष्ठितंभवति॥ ग्रासमत्तु कुक्कुटाण्डप्रमाणं यावतो वा मुखं प्रविशेत् मुखेनमुखेप्रवेशः॥ प्राजापत्यकृ
२ च्छ्रमाह॥ अयमेव पादकृच्छ्रस्त्रिसहत्य प्राजापत्यो विधीयते॥ जपहोमसहिता एते त्रैवर्णिकस्य तद्रहिताः शूद्रस्येति बोध्यं तत्प्रकार
२ ग्रे यान्तरास्वसेय॥ ॥कृच्छ्रातिकृच्छ्रमाह॥ पयसैकविंशतिरात्रवर्त्तनेमेतत॥ द्वादशरात्रमद्रकेनापमितपरेशत्तन्त्रा जानयोर्व्यवस्था
॥ ॥पराकमाह॥ ॥द्वादशाहमुपवासेनैतत्॥ ॥सौम्यकृच्छ्रमाह॥ पिण्याकौदनतिक्राबुतक्रजलशक्तूनां पंचानामेकैकं प्रत्यहं
मशनेनवरमेन्तिउपवासोनवषड्भिरहोभिरेतत। पिण्याकशक्तुतक्रोपवासैश्चतुर्भिरहोभिरपमितिकेचित॥ अनयोरपि शक्त्यपेक्षा
मेवव्यवस्था॥ जलापहृषकृच्छ्रमाह॥ एषामपि पिण्याकादीनां पंचानामेकैकस्य त्रिरात्राभ्यासेन पंचदशाहोभिरयं भवति॥ अत्र पंच
दशाह्निरविधानादुपवासाभावः॥ यममनुगद्दिवसोपवासाधिकोनैकविंशतः साध्यमेतदित्याह॥ चांद्रायणमाह॥ मयूराण्डप राम०
रिमितान्यासानप्रतिपदमारभ्य पौर्णमास्यावधि एकैकवृद्धेन पंचदशग्रासानमावास्यायामेकैकग्रासह्रासेन पित्वाऽमावास्यामुपवासेन भवती २
दंसिद्धा॥ एतच्चपवत्सानारयोरपि दत्तिपवमध्यमिप्रमाणे। इदमेव पराकृष्णपक्षमारभ्य प्रतिपदि चतुर्दशग्रासानजाध्यायैके

कं हत्वा सपिता अमावास्यां सूर्योपरागेन शुक्ले एकैकं कृष्णपक्षे पौर्णमास्यां पंचदशग्रासभोजनेन पिपीलिकामध्यं तपातं चान्द्रायणमपि स्पष्टं ॥ प
क्षान्तु तिथिवृद्धिह्रासाभ्यां तदा तदनुरोधेन ग्रासवृद्धिह्रासावध्यातव्यौ ॥ चत्वारिंशदुत्तरपिंडशतद्वयस्य प्रत्यहमष्टसंख्याकं समतया भोजनेन चा
न्द्रायणं स्यान्मध्यमं भवति ॥ पिंडाष्टकस्य प्रत्यहं मध्याह्ने भक्षणेन यतिचान्द्रायणं ॥ चत्वारः प्रातः चत्वारो रजन्यामिति शिशुचान्द्रायणं तत्र
षोडशविंशात्तस्य प्रत्यहमिति ऋषिचान्द्रायणं ॥ यतिचान्द्रायणादिषु चांद्रायणत्वमुपचारात् तत्साधनात्ममासो ग्रासः ॥ एतेष्वेतत्सर्वेषु व्र
तेषु शिरःकेशादिवपनपूर्वकं परेषामिके श्मश्रुतिरिक्तवपनपूर्वकं त्रिपापप्रायश्चित्तार्थमनुष्ठानेन ग्रासंख्याभ्युदयार्थैः यज्ञादिभिरपि महा
पातकिभिः केशरक्षणेच्छया व्रतदक्षिणा द्विगुणा विधेयं ॥ ॥ इति व्रतप्रकरणं ॥ ॥ अथ प्रायश्चित्तप्रकरणम् ॥ तत्र तत्स्याधिका
रिणमाह । विहितानामसंध्योपासनादीनां नित्यानामशुचिस्पर्शो दोषस्नानादेर्नानैमित्तिकानांचाकरणान्निंदितानां सुरापानादीनां उ
रोिकारणे च नरः पतति ॥ तत्र ब्रह्महत्याप्रायश्चित्तानुष्ठाननिमित्तपर्वकं प्रायश्चित्तमाह ॥ तत्र पद्यापारसमनंतरं समयांतरे च ब्राह्मणप्रा
प्राणवियोगः कारणांतरविरहे स्यो जायते स एव ब्रह्महा स च स्वव्यापादितब्राह्मणशिरो पाललाभे अन्यदीयं ब्राह्मणशिरोऽपि तावशिरः कपा

मि०
२
3

लब्धजन्मा शुक्तोभिसार्थमयःटम्भपपात्रपाणिस्सन्नभवनानि चातुर्वर्ण्यान्निजरक्षे परिभ्रमन्नरण्यावासो जपी मुंडो वा स्वकर्मख्याप
यन्नार्येदर्शनेः ध्वनेो यक्रमन्स्वकेनेष्टक्रुस्पर्शी संध्योपासनवान्द्वादशाब्दीरात्रिव्रतमनुष्ठाय शुध्येत ॥ एतच्चाकामतो ब्राह्मणवधे
ज्ञेयम् ॥ कामतः कृते हि गुरुणः ॥ यतुर्दर्शविशुद्धिहेतुः दिताप्रमाण्याकामतो द्विजं ॥ कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते इति मनुव
चनम् ॥ तस्यायमभावः ॥ पापसंहरशक्तौ न टकोत्पादिकाप्रवृत्तानिरोधिका च ॥ तत्र कृते न प्रायश्चित्ते न प्रवृत्तानिरोधिकापापशक्तेर्नाशे
पि न नरकनिरोधिकापापशक्तिनिष्कृतिः । प्रायश्चित्तव्रतत्राग्निपतनमेवोभयशक्तिनिरोधकं । पश्चात्तु व्याघ्रादिभिर्वा समानं ब्राह्मणार्थं रक्ष्य
न गोद्वादशं कृत्वा अश्वमेधे स्नातो वा अज्ञानतो वा दीर्घ प्रशस्तानां ब्राह्मणानां वा तादृग्विधं मोचयित्वा तेनाप्येन ब्राह्मणाय सर्वस्वं वा दत्वा द्विमि
त्यामानीयतत्र स्थैर्यं ततो वा द्वादशवर्षाद्यैः कृतैः शुध्येत् ॥ इदं चाकृहीत द्वादशवार्षि कस्यान्तं तैरेतत्संभवेन पुनरेतेभिन्नं प्रायश्चित्त ^ राम०
मिति बोध्यं शं ॥ ॥ अथ प्रयोजयितृअनुमंतृअनुग्राहकाभिमतादीनां प्रायश्चित्तमभिधीयते ॥ तत्राप्रवृत्तस्य प्रवर्तकः प्रयोजकः ॥ स च त्रिवि २
धः ॥ आज्ञापयिता अभ्यर्थयिता उपदेष्टा चेति । तत्र स्वयमप्रवृत्तो मोचयस्य हिंसायां प्रेरयिता । आज्ञापयिता स्वयमन्तुत्कृष्टः उत्कृष्टस्य हिंसायां प्रार्थ

नादिना प्रवर्त्तकः · अप्रार्थयिता · अनपोस्य स्वार्थसिध्यर्थमेव प्रयोजकः ॥ उपेदृष्टा तु ममेदौ ह्यत्र पुरः सरंस्तु यन्त्र मित्यं जलौकस्य परिदृश्य भ

वति ॥ तत्र षड्वार्षिकं परार्थं प्रवृत्ते नोपदेष्टुः तत्तोपि किंचित्प्रतं नं प्रयोजनस्थानीयत्वे न लोभादिना प्रवृत्तानां प्रयोजना नास्य प्रतौ

नां · पूर्वोदितमाहष्टाभाववत् प्रत्यवायाभाव इति वाच्यं ॥ प्राणिमात्रस्य हिंसायामनधिकारित्वादन्यप्रेरणे न प्रवृत्तानामपि हिंसाविति

वेशेन प्रवृत्ते प्रत्यवायसंभावात् ॥ पञ्चाग्नौ प्रवृत्ताः नां अस्वर्गकामिता शास्त्रफलं प्रयोजकत्वेनीति न्यायेन न फलसंबंधः ॥ अत्र मंत्रात्

प्रवृत्तस्य प्रवर्त्तकः । सद्विविधः ॥ कश्चित्स्वार्थं प्रवर्त्तकः कश्चित्परार्थः । तत्रैकस्य प्रयोजकत्वादपि अन्यस्य फलादपि असफलत्वाद्धिरं

गत्वेन साक्षेवत्तु बौधिको न च हिंसायां प्रवृत्तस्य प्रवर्त्तयितुं साक्षात्मारणविधानानुकूलव्यापारकरणेन · साक्षात्कर्तृप्रवर्त्तकत्वाभा

वात्कथं दुरितसंबंध इति वाच्यम् । महर्षोभिषिक्तजनस्य दंडसाध्यसेन हिंसिस्य दमपेनवा शिथिलप्रयत्नस्य साक्षाद्धंतुरन्तर्मतस्य दंडयो

ग्यत्वपत्तेरिति तस्य तत्संबंधात् ॥ अतु ग्राहकस्य बलप्राप्तमानारिक्षणे अधिकारिसकारस्य कः तत्स्यद्विमान मयपादपुनर्य्यतो अतस्तस्य

पारोनं नवविषिकस्य निमित्तोत्पन्नधर्मिमित्तमन्यत्सकः ॥ अत्र विधुः ॥ आज्ञप्तातिनो वायिधेनावो विप्रयोजितः । अमुहिस्य पत्रज्ञे·

मि०
५
4

त्पारणाऽन्नतमाहुर्ब्रह्मघातकम् ॥ तथा । ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव वा ॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं ॥ २ ॥ त
त्रनिमित्तिनो मरणानुसंधानमंतरेणापहतेरनुसंधानाच्च प्रायश्चित्तं षाण्मासिकं भवति । न च प्रवाहितस्य कारणत्वमात्रात्पित्रोरपि हननकर्तृत्व
रूपो दोषः स्याद्धननकर्तृत्वस्य संगरहितावाच्यम् ॥ स्वस्यातिरिक्तकार्ये सनयगाणव्यापारयोगानव भावेन कारणत्वात् । अतः पुत्रोद्देशेन हनन पि
तुर्धर्मानुसंधानेन न स्वस्य प्रमादेन पतितेऽपि पित्रा हननं तस्य दोषाभावः ॥ न हि त्वापुत्रेन रक्षितः पतितानां व्यापादयामीति वदन् ब्राह्म
णो हन्तुमापतति । अतो व्यापादितुः कर्तुः कारणाकारत्वमेव न तु हिंसाहेतुत्वे सवधेयं ॥ अशीतिवर्षस्य वृद्धस्योनषोडशस्य बालस्यैव न तु हिं
साहेतुत्वे सवधेयं ॥ अशीतिवर्षस्य वृद्धस्योनषोडशस्य स्त्रियो रोगिणश्चैतदर्धं अनुपनीतस्य तु पादमात्रं तदपि पित्रादिभिः क राम०
र्तव्यं ॥ परात्मसंतं ग्रहणरहितोऽसंतनिग्रहणोपरि भग्नेन वात्सल्यमक्षो धादि म्रियते तत्र त्रैवार्षिकं । पादत्तु निमित्तस्य तग्राणवा चरत्स्ववा ५
प्यंतनिर्गुणस्त्वैकवार्षिकं ॥ कृचिज्जसस्यापि हिंसाहेतुत्वे औषधाहारादिभिरुपकुर्वतो दोषाभावः ॥ अतः एवं स्ववर्ज्ज ॥ औषधस्नेह
माहारं दद्गोब्राह्मणादिषु ॥ दीयमाने विपत्तिश्चेन्न स पापेन लिप्यते ॥ तथा दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वतां प्राणसंत्राणमिच्छ

येषां प्रायश्चित्तं न विद्यते ॥२॥ इदं च विराडनाहिताग्निवद्विषयकं ॥ अन्यथा तु भिषक्मिथ्याचरन्दाप्य इति वचनाद्दोष एव ॥ पत्न्या पितृस्वसृ
षाभावः । तथा क्रोशद्विजनितमनुना शस्त्रेणात्मानं प्रहृत्य पुनराक्रोशनादिकर्तृधनादिना तेन वितेमरणाद्दर्शने जनानां समस्तम
भिधत्ते नात्रापराध इति तत्रापि तत्स्वदोषाभावः ॥ अप्रमादेन पथुक्तस्य सर्वं स्वत्रा स्वरा स्वमप्रमत्तपवधे त्वर्द्धहत्याव्रतं · चान्द्रायणं · प
एकपारस्तस्य त्वविधेयं ॥ अप्रमत्तस्य वधे तु ब्रह्महत्या ॥ अहं हात्यापासरस्वसा : पांमेलोकविश्रुते ॥ शुध्य त्रिपुरदाणापीत्रिरात्रोपोषितो द्वि
जः इति ॥ इदं च ब्राह्मणस्यैव हन्तुः · क्षत्रियस्य तु द्विगुणं : वैश्यस्य त्रिगुणमिति चं ॥ तथा च ब्रह्मचारिणोऽपाः शवकर्षे द्विवपसं · द्विगुणं का
नस्थानां त्रिगुणं यतीनां · चतुर्गुणमिति क्षेपः ॥ तन्मध्यस्थस्वपत्न्ये पितृस्वामत्सुहृदो वा ॥ तथा सोमपानस्थितवाहज्ञापितविध्यात्रे तस्य क्र
तुलाब्राह्मणी हिंसकोः त्रिगोत्रजो ब्राह्मणो वधे चातुपजात स्त्रीपुंनपुंसकभ्रूणे ब्रह्मणा भैक्षे हते ब्रह्महत्याव्रतमनुतिष्ठेत् ॥ तथा क्षत्रि
यादि रजस्वलात्स्त्रीवधे उपजातस्त्रीपुंनपुंसकादिभ्रूणे सत्ते स्वा भैक्षे हते तत्र दर्शने ब्रह्महत्याव्रतं चरेत् ॥ तथा च धात्र्येमात्यात्मशस्त्र्यादिना प्रहारे
न कथंचिन्नष्टं : स्तवधाभावेपि ब्रह्महत्याव्रतमन्तौ पमेवः ॥ ॥ ब्रह्महत्यासमान्याह ॥ ॥ गुरूणामनृतदोषारोपणं नास्तिक्यादि निवेश

मी० न: वेदकुत्सनमब्राह्मणस्यापि मित्रस्य वधो ऽसच्छास्त्राध्ययनविनोदेनाधीतस्य वेदस्य नाशनमिति ब्रह्महत्यासमानि ॥ कुटुंबा
५ शक्त्यात्तु सीदत्कुटुंबो यादि विस्मरेत्तच्छास्त्राभ्यासात्तावता तदोपपातकं ॥ एतेषामातिदेशिकेभ्यो ऽप्यमत्या दशाब्दं नंदाद्दश वार्षिकादि प्राय
5 श्चित्तमित्यलं ॥ ॥ इति ब्रह्महत्याप्रायश्चित्तप्रकरणं ॥ अथ सुरापानप्रायश्चित्तमाह ॥ ॥ तत्र सकृत्कामकृते सुरापाने सुरं वा
वह्नितप्तद्रवां तामेवैकां पायया ॥ दृतान्लिस्प शे द्राह्मस्त्तिकं विधाय । आर्द्रेकं वासा लोहेन ताम्रेण पात्रेण पीत्वा मरणाच्छु
द्धिमाप्नोति ॥ तत्र पानसंज्ञा क्षमाधःकंठाजंतौ लभेत्स्वयं स धृत्यसेयमारिष्ठमैरेयं नारिकेरजं ॥ समानानि विजानीयान्मद्यान्येकादशैव
वतु ॥ द्वादशं तु सुरा मद्यं सर्वेषामधमं स्मृतमिति ॥ उक्तत्वात् सुरा वै मलमन्नानां पाप्मा च मलमुच्यते तस्मान्नात ॥ वात्रान्नविकारस्यैव सु
राशब्दवाच्यत्वम् ॥ किंचित्गौडी माध्वी पैष्टी च सुरा सर्वस्यां ठिरित्याहुः तन्न: ॥ सुराशब्दस्यान्नविकार एव रूढत्वात् अपरागात् तत्र ब्राह्मणस्य एम०
मद्यमात्रप्रतिषेधः ॥ क्षत्रियवैश्ययोस्तु सुरामात्रप्रतिषेधः शूद्रस्य तु न सुराप्रतिषेधो नापि मद्यप्रतिषेधः ॥ अकामकृते तु जलादि ५
बुध्यात्तत्पाने बालवृद्धेन मितवस्त्रपरिधायी जटी लोहादर्शवार्षिकं ब्रह्महत्याप्रायश्चित्तोक्तं व्रतं चरेत् ॥ पानीयबुद्ध्यापाने पुनः स्वस्यच्छदेने

वर्षत्रयं शङ्खलिखितौ कणान्पिण्याकं वा भोजनानन्तरस्परित्यागपूर्वकं भुंजीत यं व्याघ्रपिवंतशुध्येत ॥ अथ यत्राह बृहस्पतिः ॥ सर्वे नेष्ठा
भूमिदानं वा कृत्वा ततः शुध्येत इदं द्वादशवार्षिकेण समं वा विकल्पितं बोध्यं ॥ सुरापा अकामकृते तालमात्रं सरोगे त्वद्वेसहकृद्धजसं
पिण्याकं भुक्त्वा कणान्वा केशनिर्मितवासः परिधाय जुह्वन् शुध्येत । यदत्र तन्मोघषसमाध्यनर निराकरणाय गौडीमाध्वीपैष्टीनां त्रिविधपि
वेत ॥ तदा क्रमेणातप्तकृच्छ्रपराकचान्द्रायणानि कुर्वीत ॥ यदा तु सुरासंस्पृष्टमुदकं रसमेवान्नं भक्षयति । तदा पुनः स्नपनपर्वं कृत्वाशुमुच्छं
सुरापात्रस्थजलपाने मतिपूर्वकं तु तदेव घृतप्राशनमहोरात्रमुपवासश्च । पर्युषितस्य नीरपानेन तु शंखपुष्पीविपक्वक्षीरसर्पि
पीत्वाहं पिबेत् मतिपूर्वं तु तस्य नीरपाने सप्तरात्रं शंखपुष्पीशृतं पयः पिबेत् । अभ्यासे तु द्वादशाहं ब्राह्मीं पिबेत् । सोमयाजी द्विजो अ
कामान्मद्यमाघ्राय पवित्ररशु प्राणायामं वा घृतं जग्ध्वा शुध्येत् कामकृते तु द्विगुणं । तद्गन्धिल्लिछपाने घ्राणे सांतपनं कृच्छ्रं । अनिच्छपाते प्रा
जापत्यं । पैष्टीव्यतिरिक्तमद्यपाने त्वज्ञानकृते विरात्रव्रतोपार्जने चतथान्नष्ठिते व्रात्यरोगेन तत्सहत्वाप्स्वलापनाष्ठचान्तपर्वोपनं मौञ्जीका
र्येणैतेषां लपने प्रवेशमात्रेण तु उदुंबरबिल्वपलाशकुशानां उदकं षडहं त्र्यहं पीत्वा शुध्येत ॥ एतत्सर्वमतलादिविषयकं गौडीमाध्वीरस्तान

मी० तःपानेकृच्छ्रातिकृच्छ्रातिकृच्छ्रसहितः संस्कारश्च ॥ मतिपूर्वकं तु तयोःपानेपिरापाककरणम् अकामतोपूर्वकं त्रैवार्षिकं ॥ अभ्या
६ सेनु ॥ जातवेदोवरुणोसुरापानेनशुद्धिः ॥ मघवासिमन्त्रस्यस्यनीरपानेअज्ञानकृतेहर्ममूलविषयकपापसमूहंपानेनशुद्धिः ॥
6 मघवासित्वामन्त्रस्यस्यनीरपानेअज्ञानकृतेहर्ममूलविषयकपापसमूहंपानेनशुद्धिः ॥ अभ्यासेतुपमोदुम्बरबिल्वपत्रानकु
शानांजलंब्रह्मपीत्वाशुध्यति ॥ ज्ञानतःपानेपंचरात्रं ॥ कृतशंखपुष्पीपयसासिद्धिंवेत् ज्ञानतोभ्यासेतुसप्तरात्रंगोमूत्रम
यंतात्र्यासेद्वादशाहं ॥ पयसाब्राह्मीसुवर्चलांवाब्राह्मलपत्न्यातुसुरापानप्रायश्चित्तार्द्धमनुष्ठेयं ॥ त्न्यातुसुरापानप्रायश्चित्ता
र्द्धमनुष्ठेयं ॥ बालेनाकामकृतेसुरापानेत्रैवार्षिकं कामकृतेषड्वार्षिकंप्रायश्चित्तंविधेयं ॥ कृच्छ्रान्तुराद्विष्वेवमेव ॥ अनुपनीत प्रम०
स्यमोहात्सेवनेतिरिक्तसुरापानेतदोपपितारिमातृकृच्छ्रत्रयंकार्यं ॥ ॥सुरापानसदृशान्याह ॥ ॥छत्राकविड्वराहलशुन ६
ग्रामकुक्कुटपलांडुगृंजनानांकामतोशनं ॥ गृहस्थकोटिसमुल्लंघ्यार्थंराजद्वारादावचनवेदेनचतुर्वेदोल्लंघनंतमाषरागंरजस्वला
धरपानमितिसुरापानसमानिप्रायश्चित्तंचैतेषुब्रह्महत्यासमं ॥ ॥ इतिसुरापानप्रायश्चित्तप्रकरणम् ॥ ॥ अथस्वर्णस्तेयप्रा

पश्चित्तमाह॥ तत्र कामतो वा ब्राह्मणस्वर्णहारी आर्द्रवासा आपसंघादिरवाहनन् त्वपास्त्र मं मुशलं समर्प्य कर्मरव्यापयन्
राजानं वेदरनेन मां व्यापादयेति तस्तेन हतो मृतो जीवन्वा शुद्धो भवति। सुवर्णशब्दश्चात्र परिमाणविशेषवचनः जालसूर्य
मरीचिस्थं त्रसरेणुरजः स्मृतं तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट्ते यवो मध्यस्तु ते त्रयः। कृष्णलः
पञ्च ते माषः ते सुवर्णस्तु षोडशः इति स्मरणात्। तत्र बालाग्रमात्रे एकप्राणायामो लिक्षामात्रे त्रयः लिक्षे राजसर्षपमात्रे चत्वारि
ष्टसहस्रं गायत्रीजपः गौरसर्षपमात्रे दिनैकं गायत्रीजपः यवमात्रे दिनत्रयं कृष्णमात्रे कृच्छ्रं सान्तपनं माषमात्रे गोमू
त्रयावकाहारः त्रिभिर्मासैः शुद्ध्यतीति विवेकः अतोऽधिकस्य सुवर्णस्य न्यूनस्यापहारे वत्सरं॥ यावकाशनव्रतं एतद्वि
त्तस्वामिने एकादशगुणं वित्तं देयं। यदा जगद्गुरोः तृत्यादिधनमपहरति तदापाहम्प्रभृति सर्विषाम्पतितो निर्गतकेश
श्मश्रुर्लोमा गोमयाग्निना दग्धः शुध्यति। यदा तु अकामतो वस्त्रपात्रादि यष्टितं रजतं तेन खण्डं गानदपि हरति तदा
ति तदा द्वादशवार्षिकं व्रतं कुर्यात्। यदा तु पतितो महाधनः तदा तन्तुलितं सुवर्णं दद्यात्॥ अथ जनमपि दानेऽपशक्ततया वर्ज्यो

प्रि०
7

वधिप्रवृत्तं भरणांसमं वित्तं च हरेत्. यत्र तु निर्गुणस्य स्वामिके न तत्स्पर्शितं तपोषद्ध्या । पिं कृतो र्थस्य मरणं वा व्रतं कुर्यात्. यत्र तु हरणसमनं
तरमेव तत्स्वामिने सुवर्णं समर्पयति जातानुतापः तत्रा त्रैवार्षिकं. यत्र तु मनसैवापहारे प्रवृत्तस्तस्मनं तरमेव निवृत्तस्तदा द्वादश
रात्रं वा गायत्र्यष्टसहस्रैः पूतो भवति. बालवृद्धादिषु पूर्ववत् दंडं च प्रायश्चित्तं न तु ताम्ररसादि संसर्गित्वे तापादिते महारजते किं तु मुख्य
एवागाधारा सहस्राद्यधिकं स्वर्णाद्यस्यापहरणे सुवर्णप्रायश्चित्तमेवा गाधाणं दशकावधि रौप्यापहारे चान्द्रायणं. तदूर्द्धं मासे
ताद्विगुणम्॥ तदूर्द्धं मासहस्रात्त्रिगुणम्। ताम्रादिधातुहरणे तु पराकव्रतं. धान्यहरणे कृच्छ्रं तिलहरणे चान्द्रायणं. तदूर्द्धं मा
शाताद्विगुणम्॥ तदूर्द्धं मासहस्रात्त्रिगुणम् ताम्रादिधातुहरणे तु पराकव्रतं. धान्यहरणे कृच्छ्रं. तिलहरणे चान्द्रायणं: स्वर्ण राम०
स्तेयसमत्वमाह। ब्राह्मणसंबंधिनामश्वरत्नमनुष्यस्त्रीणां हरणमिक्षेपस्य च हरणे मितिसुवर्णस्तेयसमानि.। अत्रापि
प्रायश्चित्तं सुरापानसमं ज्ञेयं॥ ॥इति सुवर्णस्तेयप्रायश्चित्तं॥ अथ गुरुतल्पप्रायश्चित्तमाह॥ तत्रोभयेच्छातो जननीं प्र
त्यगमनसमुरतापप्रवृत्तो अग्निवर्णीकृते कार्ष्णायसे शयने मुंडितलोमकेशो लोहमय्याः स्त्रीप्रतिमया सह स्वापेन देहमुत्सृजेत्॥ सु

तेनप्रोत्साहितायांजनन्यांसलिलंगाववंधेक्षिप्तागजलाबाधायनेनस्त्यामाशायांगा छन्नस्त्रजुगातिरप्रतिविद्येपप्रतवोद्दिभिनिरु
छ्यते· तत्रोपविश्यदेहमुत्सृजेत्॥ तयाप्रोत्साहितेनेनप्रवृत्तोज्वलत्यतिनिद्धाग्निं॥ नतमसयानपोरम्यइष्टयं· इदंचमुख्यस्येवपु
त्रस्यनहतस्त्रीतादीनां· किंच· एतत्सवर्णायामत्रः सपत्न्यांकामप्रवृत्तोजनन्यांवाकामप्रवृत्तोभवति· जनन्यांकामेनप्रवृत्त
सुच्छन्नाप्रवृत्तोकरीवाग्निनाआत्मानंअवदाहयेत्॥ तत्सपत्न्यांसवर्णायांअकामप्रवृत्तौरेतः सेकादर्शीवाड्· निवृत्तः कामप्र
वृत्तोवाद्वादशवार्षिकंपूर्वोक्तविधिनाकुर्यात्व्यभिचारिण्यांतत्स्यांकामतोप्रवृत्तोपरमासान्तप्रकृच्छ्रंव्रतंब्रह्महात्र्यंवाकुर्यात्
तत्रकामप्रवृत्तोवेदजपसहितोचांद्रायणमात्रंकुर्यात्तः ब्राह्मणीपुत्रस्यक्षत्रियायुरुपत्नीगमनेकामपूर्वेनववार्षिकं अभ्यां
सवधोः कामतः सकृत्प्रवृत्तोत्रैवार्षिकंअष्टमकालाशनव्रतमभ्यासेत्वंड्खेदः तस्यैवशूद्रायुरुपत्नीगमनेकामकृतेसद्वा
र्षिकं· अकामकृतेत्रैवार्षिकंकृच्छ्रंतत्राभ्यासेमरणावधिव्रतवर्येत्तस्यैवशूद्रागुरुपत्नीगमनेत्रैवार्षिकं· तत्राभ्यासेद्वादश
वार्षिकं· अकामकृतेअब्दमेकंकृच्छ्रंतत्रवाभ्यासेत्रीन्मासानवांद्रायणंकुर्यात्। इदंतवधेयंतथाप्रोत्साहितस्यकामकृतेक्षत्रि

मि० पापमनेरेतसेकाद्दर्वोग्निहृत्तोमासत्र्यपंप्राजापत्यं· उभयेपस्याजन्म हृतौताववेदेवकृच्छ्रं स्वेनतस्पाप्रोत्साहनेतावेदेवयच्छ्रातिकृ
८ च्छ्रांतस्थानं अकामकृतेतुतम्मनेतपाप्रोत्साहनेतौवेदैवं अतिकृच्छ्रं· उभयजनितेतप्तकृच्छ्रं· स्वपंप्रोत्साहनेव्यादापपां· वैश्या
४ पांतुकामप्रवृत्तो उभयेच्छाजनितापारेतः सेकात्स्वोद्धिहृत्तौतप्तकृच्छ्रं· स्वपंप्रोत्साहितायांपराकः तयाप्रोत्साहितस्यसांत
पनं· अकामकृतेतुतस्मिन· तयाप्रोत्साहितस्यपंचरात्रानशनम उभयेच्छाजस्यप्रवृत्तौसप्तरात्रानशनं· स्वपंप्रोत्साहनेअ
ष्टरात्रंशूद्रायांकामकृतेतस्मिनस्वेच्छाजनितेतथैवनिवृत्तौपराकः तयाप्रोत्साहितस्यातिकृच्छ्रं· उभयेच्छाप्रवृत्तौतप्तकृच्छ्रं
प्रायश्चित्तंभवति· अकामकृतेतुतपाप्रोत्साहितस्यप्राजापत्यम उभयेच्छातः प्रवृत्तौशांतपनंस्वेनप्रोत्साहितायांसप्तरात्रो एम०
पवासमितिज्ञेयं· स्त्रीरणांनुसकामानांईदृशीनांमरणांतिकमकामानांतुपद्वार्षिकंपूर्वोक्तंक्रमेणज्ञेयं।। अथगुरुत
ल्पातिदेशमाह।। ।।पितुः स्वसामातुःस्वसाजलानीसपाभगिनीस्यः आचार्यतनयातत्पत्नी· स्वतनया· स्वभगिनीसखी·
पितृव्यसपत्नी· सखस्य· शिष्यस्यराज्ञः साः धात्रीः प्रव्रजिताब्रात्सशास्तितास्ताव हरतल्पेनेनातिदिष्टाः तेनेतासांशानतः स

रुद्रमनेः व्रतावधिकं घ्रानुष्ठानमज्ञानकृते तस्मिन् चांद्रायणद्वयानुष्ठानं वेहितव्यं· एकरात्राभ्यासे तु· वर्षत्रयं तु द्वैधमकामतो सं
ताभ्यासेन ववार्षिकं कामकृते त्वग्निप्रवेशः । चांडाल्यास्तु कामतो संताभ्यासे द्वादशवार्षिकं मन्मतपर्वं वत् ॥ ॥गुरुतल्पसमामा
हुः ॥ मित्रभार्या तमजातीयाः कामानुलोमा च कस्य काव भगिनी अनुजवधू चांडाली चैताः गुरुतल्पसमानि· अस्यास्तु
कामतो संताभ्यासे द्वादशवार्षिकं । तत्र गुरुतल्पसंत्वेनातिदिष्टानां मत्यामिः प्रायश्चित्तविकल्पा पात्रापुरेत्तः सेकार्यवीद्धः
हत्वा वेकेन चांद्रायणेन मासोपवासेन वा शुद्धिः । एवं प्रायश्चित्ते पुत्रवधा न्तिक द्वौ न जातु ब्राह्मणं हन्यात् इति वचनात् ब्राह्मण
स्यैव तस्य महापातकित्वं अतिरिक्त विषयकत्वात् तस्यापि तादृशस्य वध इति वितिपक्षद्वय मध्यमकरेख निरूढं ॥ ॥ इति गु
रुतल्पप्रायश्चित्तप्रकरणम् ॥ ॥ तत्र संसर्गिप्रायश्चित्तमाह ॥ ॥ तत्रैकशय्यासनं तदेकपान्नभोजनमेकपंक्तिभोजनमे
कभांडपचनं तद्याजनं तेन वा स्वस्य याजनमध्यापनं तेन वा स्वस्याध्यापनं तस्मै कन्यादानं तस्माद्वा कन्याप्रतिग्रहः एकपात्र
भोजनं चेति संसर्गाः । तत्र तत्संसर्गी संवत्सरेणापतति ॥ कश्चिद्विशेषः ॥ एकपानभोजनाशनशयनैः यौनस्त्रैवमुख्यैस्तु संव॰

मि० २ धेसद्य एव हह द्भिश्रुनाभिहितत्वात् । पौनो विवाहः श्रोत्रियाजनः ते त्रैतरेतरयो ग्राम्याकस्वाकृत्वेन नैककर्यां नारीणां समु
दितानामेव सद्यः पतनहेतुत्वं एषु क्रमतानानुदोषहेतुत्वं । तथा च पराशरः ॥ आशनात्स्पर्शनाद्वापि संभाषात्सहभोज
९ नात् ॥ संक्रामंति हि पापानि तैलबिंदुरिवांभसीति । एकामत्रभोजने विसद्यः पातित्यं तत्र महापातकिनां बुद्धिपूर्वकं त्रस
रावाधिसंसर्गे द्वादशवार्षिकं व्रतं कुर्यात् । अबुद्धिपूर्वके तदर्धं पश्चाहं कामकृते संसर्गे कृच्छ्रं समाहे तत्स कृच्छ्रमर्धमासे पराकं
मासे चांद्रायणं मासत्रये चांद्रायणोत्तरं कृच्छ्रं वा षाण्मासिके वा षाण्मासिकं कृच्छ्रं किंचिन्न्यूनाब्दिकसंसर्गे द्वे चांद्रायणे कुर्या
त् । अकामकृते तु तस्मिन्प्रथमे पक्षे त्रिरात्रं व्रतं । द्वितीये कृच्छ्रं तृतीये सांतपनं । चतुर्थे दशरात्रं पंचमे पराकं षष्ठे चांद्रायणं । राम० २
सप्तमे चांद्रायणद्वयं । अष्टमे षाण्मासान् कृच्छ्रं कुर्यात् । संसर्गी तु पादोनं । तत्संसर्गी अर्धं । तत्संसर्गी त्रिपादहीनं कुर्यात् । दु
हितृस्नुषाहिगामिसंसर्गिणां कामतो नववार्षिकं । अकामतः सार्धचतुर्वार्षिकं । सखिपितृव्यदाराद्यगामिसंसर्गिणो
कामतः षड्वार्षिकं अकामतस्त्रैवार्षिकं । एवमुपपातकादिसंसर्गिणां कामतस्तदीयमेव व्रतमकामतोऽर्धम् । स्त्रीणां सर्वत्रार्धम् ।

गालवृद्धातुराणां तु कामतोऽस्त्वर्द्धमकामतः पादः अनुपनीतस्य तु कामतः पादोऽकामतस्त्वर्द्धं पतितेन निषिद्धपियोने संवधे परित्यते
पाकन्मोहतत्तस्य संसर्गी काले चितप्रायश्चित्तं ग्रवरा पंक्कारान्नाश्मेतेषां न समनेतेरे ति त्रिस्र चैवादिनो सद्य प्रेत्ततीर्थे वासमुद्धहे यदि
न तस्य तद्दोषः स्त्री अतिरिक्तं च पतिता वस्थ्योसन्नमयत्रमपि संसर्गान्नदहेत्॥ ॥इति संसर्गिप्रायश्चित्तम्॥ अथोपपातक
प्रकरणं॥ तत्र गोवधः प्रायश्चित्तमाह॥ तत्रो कामकृते तत्रानिमात्रवालगोहत्या मिकागोमात्रघ घेदृश मैकादशगोदा
नसहितं त्रिरात्रोपवासः। पद्मात्तु विशिष्टविप्रस्वामिकापागोर्वधः कामतोनुष्टितस्तु रामासत्रपंशाकैर्नैवषत्तैत पराउप
पातकसंयुक्तो गोघ्नो मासं पञ्चगव्यं पिबेत्। कृतपापो वसेद्गोष्ठे चर्म्मणार्द्रेण संवृतः। चतुर्थकालमश्नीयादक्षारलवणं मितं। गोमूत्रेण
चरेत्स्नानं द्वौ मासौ नियतेन्द्रियः। दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्द्ध्वं रजः पिबेत्। शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनं वसेत्। तिष्ठन्तीष्व
नुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्॥ आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले। भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकं। अनेन विधि
ना यस्तु गोघ्नो गामनुगच्छति। स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति। वृषभैकादशगाश्च दद्यात्सुचरितव्रतः। अविद्यमाने सर्वस्वं वेद

मि० विप्रो यानिवेदयेत। किंचिदधिकपोष्टतारुण्याद्युत्क्रान्तायां षष्टिकालभोजी वेरुज्जपो दद्यात् मेखलाधारणाच्च विशेषः।। परान्तत्रिपक्षे वंधिस्मा
१० जातिमात्रो पपोठिमात्र कामतो व्यापादनमनुतिष्ठेत्तत्र मासं पञ्चगव्याशी स्याद् धेनुदानं चानुतिष्ठेत्। वैश्यांस्य वंधिस्मात्क्ष
10 तारशविधे व्यापादने मासमनुतिष्ठे कृच्छ्रं धेनुपञ्चकं च दद्यात् एतादृशविधे शूद्रसंवंधिस्मा व्यापादने मासं प्राजापत्यं किंचिदधिकं धेनुद
प दानं च। कामतो व्यापादने चैतद्द्विगुणं विहितं परकामानां कामान्त द्विगुणं समन्तमित्युक्तेः। अतिबालायामतिकृशायां रोगि
ण्यां स्ववधे अर्द्धं। परान्तु कामतः सवनस्थात्रिपक्षाया वधं कुर्यात्तत्र दातव्ये धीताः तपःकेशो धारकः स्यात्ताभिः। पूतो भवति।
तत्रैवाकामकृते चेत्पादशे मासे वर्षमेकादश दानमाहरन् पूर्वोक्तव्रतानुष्ठानेनाथवा वरामासान् कृच्छ्रं तप्तकृच्छ्रानुष्ठानेन शुद्ध्यते। परान्तु एम०
रोसवनस्थश्चात्रिपक्षदुर्गतस्याः कर्म्मणा भक्तां कपिलां सप्रातिकृत्संधनवात रखद्रूरिना व्यापादयति तदा महल्लपञ्चकं मासिकं कु १०
र्यात्। परात्रो द्विविधामकामतो व्यापादयति तदा वृषभैकशतगोदानसमन्वितं त्रैवार्षिकं कुर्यात्। एकवर्षे वत्सहनने ः कामकृते कृच्छ्रपादः
द्विपादः त्रिहायने त्रिपाद मतः प्राजापत्यं। यदा गर्भिण्याघ्यधा भोपि निहतो भवति तदा विशेषः। पाद उत्पन्नमात्रे तु द्वौ पादौ द्वादशता।ता

पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनं । अंगप्रत्यंगसंपूर्णे गर्भे चेतस्समन्विते । द्विगुणं गोव्रतं कुर्यादिति । एका चेद्बहुभिः काचिद्दैवाद्व्या
पादिता क्वचित् । पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक् । एका चेद्दिसपलहलणा छ्योर्वहनं वा व्यापादने प्रतिपुरुषं पादहृपं पोह
नं वा कल्पनीयं । इदन्त्वकामकृते कामकृते तु प्रत्येकं दण्डेहेतुत्वेपि षजोमिष्याप चारोपि हेतुत्वेपि पापन्न स्मतुलघुपादः । अथ वधे
तत्राया पारिशांतिमित्तिनामापस्तंबोविशेषमाह । पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत् । योजने पादहीनं स्यात्स्वरेत्सर्वं निपातने इति
॥ पुंतु प्राघाणाशस्त्रलगुडादिभिर्गोर्निपातने तिस्रग्रहणं । पद्वाततुणवां वंधनयोक्ते र्दसरकामनतस्तदायाजापनं । अपवदयाजापत्सोरो
धादिष्वनुष्ठितेषु तदुभ्भवे प्रद्रवे परिशंकुच्यासि तदा च पद्मातुपमादसंरक्षणं न करोति तदा पादमेकं चरेद्दिसारिपयापयचरेमा
सिकपादादिकं स्नुपात । क्वचित्तु विशेषः । अतिदाहतिवाहाभ्यां नासिकाछेदनेनयाथा नदीपर्वतसंरोधमृते पादोनमाचरेत् । वि
न्तार्थदाहे शास्त्र — वाहनेगोपनार्थरोधवंधनयोक्त्रनदोषः । रक्षणार्थमपि नासिकेरादिभिर्वंधने भवत्येव दोषः । ननारिके
रेणागत्यागतावालेने चापि भोज्ये चर्नेचनघस्संस्खलेः । एते स्तुगावोन निवंधनीयात्तवध्यांजनिष्ठेत्सरशंप्रहीलि सस्त्रसात् । कुशेका

प्रा० शोध्यश्चभीपात्तस्यानेरोषविवर्जितेः सतत्वात्व· घंटाभरणदोषेनैव क्षिपतिमहात्मघ्नार्द्धं। पदातुपतैर्गोघपल्वलेमग्नामेव्वविशुद्ध
११ तापिवाससन्निवापतितात्तस्मात्श्वापदनापिभक्षिता। तदातु· मात्तापसंवेरल्लघ्रंगोस्वामीव्रतमुत्तमं॥ गोपालदोषेणमृतापोनु
------तस्यैवप्रायश्चित्तं। शीतवातहताबास्यादुक्षधनमृतापिवा शृंग्याग्ररूपेहतापांप्राजापत्यंविनिर्दिशेत्॥ इन्द्रानुकार्यान्त
रकुलत्वाभावेद्वेपहतापादेषडर्धं मतेलदं। यत्वापसंवअस्थिभंगं वाकृत्वालांगूलछेदनंतथापारनंदन्तश्रंगाग्रमासार्द्धंतुप
बानपिबेत्। अत्राग्रयशतकंपञ्चगोपात्राः। शृंगभंगोस्थिभंगंवाचर्मनिर्मोचनेपिवाद्दशरात्रंपिबेद्वत्सस्तस्यापिपादहीनोभवेत्। व
त्सेलोहधिहतावि। यद्यस्थिभंगंवाकृत्वाकटिभंगंतथैवचापादहीनोवतिपरमासान्प्रायश्चित्तंनविधानतइत्युक्तंतथापित रा म०
त्सेभंगजनितंप्रायश्चित्तमसिव। आघ्रातहास्तडमणिमारणमप्यागारसाभिहितं। अंगुष्ठमात्रस्थौल्येनबाहुमात्रप्रमाणतःसा ११
र्द्धंवसपलाशश्चंदण्डइत्यभिधीतेतत्तस्मादूर्द्धं प्रहारेणपतितांविनिपातयेत्। द्विगुणं त्वेतं प्रायश्चित्तमितिस्थितिरिति। इन्द्र
सकुलंप्राणरोतांत्रिपेपादोनांवेश्यंदशहदेएकः पादः॥ स्त्रीबालहतानामर्द्धं अनुपनीतस्यतुबालस्यपादः। नारीणांवपनावत्र

स्याजपगोष्ठशयनवर्ज्ज्यं। तासां सर्वासां केशानुद्धृत्य अंगुलद्वयं छेदयेत्। पुरुषाणां तु सशिखं वपनं द्विपादे श्मश्रुरोमापि च॥ त्रि
पादे तु शिखावर्ज्जं सशिखं तु निपातने इति विशेषः। क्वचिदुपकारार्थं प्रवृत्तौ तु न दोषः। पराह संवर्त्तः। यंत्रणे गोचिकित्सार्थं मूढग
र्भविमोचने। यत्ने कृते विपत्तिश्चेन्न स पापेन लिप्यते। यंत्रणं व्याधिनिष्पीडनार्थं सदंशांकुशादिप्रवेशनं। तथा च। औषधं
स्नेहमाहारं ददद्गोब्राह्मणादिषु। दीयमाने विपत्तिश्चेन्न स पापेन लिप्यते। तथा दाहच्छेदशिराभेदप्रयोगेषूपकुर्वतां। द्विजानां
गोहितार्थं च प्रायश्चित्तं न विद्यते। तथा ग्रामे कूपखाते च धर्मार्थं गृहदाहे च पादमृते॥ ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते। घातेश+
रैर्घराविश्यभंगनिपातने। अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते॥ ७५॥ + इदन्तु बन्धनरहितस्यैव पशोर — — — — — — — —
कान्नाद्यर्थं गृहदाहे स्खलने च। यदि तत्र विपत्तिः स्यात्तदा दमकोभिधीयते रीति॥ इदञ्च सर्वं तत्स्वरूपकं तन्मूल्येवातत्स्वामिने देत्वाम
त्समज्ञातेन वितीर्यं कार्यम्॥ ॥ इति गोवधप्रायश्चित्तं॥ ॥ अथ व्रात्यता॥ यस्योपनेतव्यमानस्योपनयनकालातिक्रमस्तस्य
मासपंचगव्याशनेन चांद्रायणेन पराकेण मासमपसा वा शुद्धिः। अनायपतिक्रमे त्रैमासिकं कृच्छ्रं। येषां तु पित्रादयोप्यनुपनीतास्त

नि॰ स्पवार्षिकं त्रैविधं कृच्छ्रं समाचरेत्। यस्य तु पितामहादेरपि न स्मर्यते तस्य द्वादशवर्षाणि त्रैविध्यं ब्रह्मचर्यं॥ ॥इति व्रात्यस्य॥ अथ
१२ स्तेय– तत्र ब्राह्मणानां संबंधि दशसुवर्णमाषाद्यधिकधनमपहरतो ब्राह्मणस्य द्वादश कृच्छ्राणि शुद्धिः। तन्निपपरिग्रहे चौ — रामासिकं वैश्य
12 परिग्रहे त्रैमासिकं शूद्रपरिग्रहे चान्द्रायणं। दशसुवर्णमाषाधिकधनापहर्तुर्ब्राह्मणातिरिक्तस्य वधः। कुंभत्रयं वस्त्रं सहस्रपलपरिमा–
णः। अकामकृते तु त्रैमासिकं। तथा ब्राह्मणानां संबंधीनां मनुष्याणां हेत्रस्माद्रहस्य हरणे चान्द्रायणं कुर्यात्। सीसायपह
रणे मासं जपन् कृच्छ्रं। एकवारं त्वमितं मभस्याद्यपहारे तु मूल्यपानशय्यासनस्य पुष्पमूलफलानां च पंचगव्यं शोधनं। द्विवार
त्वमितं मभस्याद्यपहारे तु मूल्यपानशय्यासनस्य पुष्पमूलफलानां च पंचगव्यं शोधनं। द्विगुवारं त्वमितमभोजनापहारे त्रि
रात्रं पंचगव्याहारः। तथा तृणकाष्ठगुडतैलचर्मामिषाणामपहारे त्रिरात्रमभोजनं मणिमुक्ताप्रवालादयः कांस्योपलानां एम॰ १२
महारो द्वादशाहं करणानन्तरं प्रास्मिकीर्तज्ञ श्रोत्रस्मिनां द्विखुरैकखुरापहारे पतितांधोवधीनां संज्ञाश्रापहारे त्र्यहं यपसा शुद्धिः
अत्रैवैतस्मादल्पे स्वल्पं महति महत्त्वमल्पानुसारेण कल्प्यं॥ इदं प्रायश्चित्तं तत्स्वामिने वितीर्य कार्यं॥ इति स्तेयं॥ ॥अथागमनपाक

रणोऽनाहिताग्निश्चैव व्रात्यस्तेनोऽनुपेत्य वाग्ध्या शनाद्विपयात्पुपीत ।। ।। इति अरणापन कारणोऽनाहिताग्नितो सुराविक्रये से
म वत्सुहयोलालालवणमांसमधुयाम्रतिलानां तत्र्ययोपयः पापमापूर्वरधिशुद्धंखडाहिस्तेन पंचकेषु पराकः ।। सिद्धान्नविक्रयेप्रा
जापत्यंतत्कृतेसोपवासः । पुराणमजिष्ठाखर्जूरद्राक्षाहारणे प्राजापत्यं । पनसमात्रि दिनं कदली नारिकेरवीजपूरकनारंगाणां पादकृ
च्छ्रं । कस्तूरिकायां कृच्छ्रं कर्पूरादेरर्द्धं । हिंगवादिविक्रये दिनमुपवासः शुष्ककृच्छ्रं पीतवस्त्रे त्रिदिनं अज्ञानान्मेन्दवोरवराश्वत
रभाणां पराकः । शुनां द्विगुणं । एकाहाद्देश विक्रये चौरे । अज्ञानात्पराकः । सन्ततौ नां कृच्छ्रं । इति हापुराणान्नां मोजपनं । रहस्यां
नां कृच्छ्रं पुराणी श्मश्रुवेश्मशस्त्रविक्रये चान्द्रायणं । आरामतडागपुष्करिणीसुकृतविक्रये त्रिषवणस्नानमधः शायीचतुर्थका
लाशनोऽसमसहस्त्रं जपनं संवत्सरेण शुध्येत ।। इत्यपरापविक्रयः ।। परिवित्तानुकृच्छ्राति कृच्छ्र वन ष्टाय जेष्ठायस्त्रांभार्यांसम
र्प्य तेनानुज्ञातोऽग्निकृतशुद्धे त ज्येष्ठायापयत्पापोकन्यापामह्यं तेनुज्ञा याम ग्नेरिधिषुत्ते पापूर्वाग्नि दिधिषूपस्तेतित्रिपोच्य
ते । तत्राये दिधिषूपतिः प्राजापत्यं कृत्वा तामेव ज्येष्ठाय अदत्त्वैनोढामुद्वहेत । दिधिषूपतिः कृच्छ्रातिकृच्छ्रौ कृत्वा सोढां ज्येष्ठाक

त्रि० नोपस्पृशः पर्वविषेवोद्धृत्य स्नानमुपक्रमेत ।। इति परिवेदनं ।। ।। अथ तत्काध्ययनाध्यापनयोः सुश्रामत्योक्तं व्रतचतुष्टयविकल्पः ।। पारस्करीयेनु
१३ अनुकाले कामनंपाकमर्णाभूतव्रात्यसरोगामने द्वैवार्षिकं । तादृश्याएव श्रोत्रियपत्न्या अनमपूर्वोपायामने त्रैवार्षिकं ज्ञातिमात्र
13 तमहमनेवार्षिकं व्रतेवात्सराः कुर्यात । अश्रोत्रियपत्न्याः तादृशायाः त्रिपां ग्रामने द्वैवार्षिकं वैश्यायां वार्षिकं शूद्रायाः षाण्मासि
कमिमं स्यात्त्रिपस्तत्र पारस्त्रीषुक्रमेणाक्रमेणाद्धे वार्षिके वार्षिकं षाण्मासिकानि वैश्यस्य वैश्यायां शूद्रायां वार्षिकं षाण्मासि
के शूद्रस्य शूद्रायां परपत्न्यां षाण्मासिकमित्यादि फलौ तद्विषये उक्तं । अनन्यपूर्वायां श्रोत्रियपत्न्यां चतुर्भ्यासे द्वादशवार्षिकमस्तु
त पारम्भनत्वेन पयापोप्यं । पूर्वोक्तं सर्वमहत्स्मनेतं । अकामकृते त्वेतत्सर्वमर्द्धं । अननुकाले तु पातिमात्र व्रात्यस्त्रीगामने कामकृते त्रै
मासिकृत्तत्रिपादिषु यथायथं द्वैमासिकं वा ऊरापरा मासिक्या नित्तान्त्रिपादीनां त्रिपादिस्त्रीषु द्वैमासिकादीनि । अकामतस्त्वेवा एम०
कानां द्विषष्ठैकाह्नाः गोदानमासं पवात्याहारेमासं प्राजापत्यं वपयापयनत्सवत्सरा ग्रामने तु मासोर्द्धं द्विस्त्रियामि वरित्ता शुद्धि १३
जातिस्त्रीषु ग्रामने प्राजापत्यं चतुरभ्यमविशिष्टापां तुस्त्रैराणं व्रात्यसरापात्महमुपाषितो व्रतपात्रियं हपैतस्यं व्रात्यसरागो व्रातपे

त्रं दद्यात्। क्षत्रियायां त्रिरात्रोपोषितो यवाढकं। वैश्यायां चतुर्थकालाहारो ब्राह्मणान्भोजयेत्। हयस्यां सचैलं स्नात्वा उदकुंभं दद्या
त्। वंधकीके ब्राह्मणीगमने किंचिद्ब्राह्मणाय दद्यात्। राजन्यायां धेनुः। वैश्यायां वैलं। शूद्रायामुदकुंभः। वंधकीजु चतुर्थे स्वैरिणी प्रोक्ता
पंचमे वंधकी मता तिस्रस्त्वत्र गर्भाधानेन स्वर्णं त्रिकं दक्षिणां। शूद्रायां गर्भाधाने त्र्यहं शिवर्षास्ति चतुर्थकाले भुंजीत। शूद्रश्चेद्ब्राह्मणीं
गच्छेद्वीरणैर्वेष्टयित्वाग्नौ दहेत्। ब्राह्मणाः शिशारोवापनं विधापनं ग्राहयेत्ताम् क्तोखरमारोप्य महापथे व्राजयेत्। वैश्यश्चेत्लो
हितदर्भैर्वेष्टयित्वाग्नौ दहेत्। ब्राह्मणाः पूर्ववत्। राजन्यश्चेच्छरपत्रैर्वेष्टः। एवं वैश्या राजन्यायां शूद्रो राजन्ये वैश्ये परपेः। स्वभा
र्यां त्यक्त्वा गच्छतः ब्राह्मणो शूद्रस्य द्वादशवार्षिकं। अनंतरमभिचारिणी ब्राह्मणी गमने क्षत्रियवैश्ययोः कृच्छ्रसांतपनं शूद्र
स्य मासं पावकाहारः। उदरजं कन्याधशेलब्धवेणुचर्मोपजीविकैवर्त्तभिल्लभार्यागमने सकृत्कामकृते चांद्रायणं द्वयं ब्राह्मण
स्य क्षत्रियादीनां तु पादन्यूनं। अकामकृते द्वौ रतः संकोकृस्थाद्भिः। तैः कृच्छ्रं। अभ्यासे तादृग्धिकमभ्यासे एहवाद्वयं। चांडाल्यां
गर्भे तु द्वादशवार्षिकं। गर्भे तु ब्राह्मणस्य कामकृते पराकः। क्षत्रियस्य -- व वैश्यस्य पराकः। शूद्रागर्भे साग्निः कृच्छ्रकोरदक्षिणा।

प्रि० पदान्त्वनिस्स्ततगर्भेवधस्यपनेतोपिसगः। पदासजिाभेर्थवा यमनुतिष्ठेततदोसल्लेः पतेव्रतंकुर्यात्। अपतंसंत व्छुद्रमेवराजकमाध
१४ शैलषादीनंसजात्मादिन्नाह्मणाोगछेत्तदैवंस्वत्रयंकुर्यात्। स्नगर्भोपाः पुनश्चांडालस्याभेः पतेोसप्तनतरह्णाद्विकेमुवणोदत्ति
14 णांचकुर्यात्। यदान्तोह्यसादिन्यानव्रतंनकुरुतेततदाकणोदिकर्त्तनंब्राह्मणाः॥ ॥इतिपारदार्यप्रकरणं॥ ॥वार्धुष्यलवणक्रियपो
त्वसामान्योपपातकप्रायश्चित्तं॥ तत्रहत्त्रिपंश्चोत्रिपंहत्तस्यवाह्मणोव्रातपत्तराद्वादशवार्षिकवू कुर्यात्॥ गुरुब्रजाहरणोशेवंहस
मिन्द्रियनियहः प्रवर्तनोहितानावृत्तत्संर्वंहत्तमभ्यतरतिहत्तानि॥ ईषद्धतस्येत्तत्रिपेहतेः कामेनत्रैवार्षिकं वेश्यश्चमलस्याष्टमोथः
शद्वेषाद्वशाशः। कामकारतुपथापथषड्वार्षिकंत्रैवार्षिकंवृषभैकादशगोदानसहितंवर्षमितिदृष्टव्यो जातिमात्रहत्त्रिपंतवृषप्रैक राम०
सहस्र्याणाद्वाद्वधेत्रपंत्रस्नेहव्रतंवाकुर्यात्वेदेशेणाामेकशतेद्यात्स्वेच्छंतद्धतंवा। शक्तिाद्शेश्चक्षियससन्नाद्वशधेनूर्द्दद्यात्स्वर्णमा १४
संव्रतवाहानंतपसोश्वशक्त्यापेक्षयापा अवस्थाद्वहत्तस्येत्तत्रापेकामतोव्यापदितेक्रमेणात्रे - - - - - वंदैमासिकंचान्द्रायणं व्वेत्ते
यांत्र्यकामतस्त्रिरात्रोपवासाहितंवृषभैकादशगो - - - - - व्याग्याशनंमासपयोव्रतंयथाक्रमेणभवति। एतत्सर्वंब्राह्मणा

स्येवः तत्रिपादोनं वैश्ये — — शूद्रे पादः ॥ इति क्षत्रियादिवधप्रकरणम् ॥ ॥ इह तु ब्राह्मण्यादिस्त्रियः कामतपापातिलोम्ये
न प्रमत्ताः हत्वा स्वदारपयाक्रमेण्यारतिधनुः छागमेषांश्च दद्यात् । कामतस्त्वृषभद्वयं द्विरकमसि — षयाक्रमांश्च अकामत ईषच्चाभि
चरितव्रताद्ब्राह्मण्यान्तु शूद्रहत्याव्रतं दशधेनूर्दद्यात् । क्षत्रियादिस्त्रीषु कामतो पीरमेव अकामतो वैश्यावधे दशधेनूर्दद्यात् । काम
तः शूद्रावधे मासपंचगव्याशनो वराकानन्तो ब्राह्मणी आपारपक्षितरा द्वादशमासिकं । आत्रेयीवधे तु पूर्वोक्तं ब्रह्महत्याव्रतं ॥
इति स्त्रीवधप्रायश्चित्तं ॥ ॥ अस्थिमतां सहस्रं हत्वा अनस्थिमतां मन्तुग्राम अनडुहो ना शक्नुयात् परिपूर्णां हत्वा शूद्रहत्याव्रतं
षाण्मासिकं कुर्यात् । दशधेनूर्वा दद्यात् तत्सत्ताधिकवधे धिकप्रायश्चित्तम् अनन्तु प्राणायामोनस्थिके साक्षिके तु किंचित्तु
विशेषः — — — — — गोधानकुलमण्डूकश्ववाषककाकोलूकान् हत्वा अहे पयः पिबेत्पादकृच्छ्रं नरो स्नानं यो जगामनं
वा कुर्यात् एषमुपहितेतु विशेषः । मार्जारं नकुलो हत्वा चाषं मण्डूकमेव च श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् । कामतो
पाज्जारिमूषकनकुलसर्पछुछुन्दरीमंडूकानां वधाभ्यासे द्वादशरात्रं कृच्छ्रं किंचिद्दानं च । अपि वा जेह्नते पज्वनी लाद्ध्यावारेपा

गतो द्विपश्च। शुके द्विहायनो वत्सः। रासभाजमेषेषु तेकमेको वृषः। क्रौंचे त्रिहायनो वत्सः तथा हंसश्येनकपिव्याघ्रशृगाल
प्रि० बकमयूरभासटिट्टिभानां वधे प्रत्येकमेकां गां दद्यात्। हरिणादिमृगाणां वन्यानां तु हत्वा वत्सतरीम्। उरगो अयोमयो दण्डः। गो
१५ ब्राह्मणा नपुंसके सीसं पलालभारो वा। शूकरे घृतघटः। उष्ट्रे गुंजा। अश्वे वस्त्रं। तित्तिरौ तिलद्रोणकचतुरष्टकपरिमाणः। पुष्प
15 फलादिस्थितसत्त्वव्यापादने घृताशनं। यत्र तु प्रायश्चित्तं नाभिहितं तत्राष्टमुष्टिधान्यं किंचित्सुवर्णं वा देयं सहस्रसंख्या
धिकानां नास्थिमतां तु प्रायश्चित्तमभिहितं। पारावतेन नक्तभोजनं। मूषकमार्जारसर्पाणां वधे कृसरभोजनं दधिगालो
हदण्डः। गोधाशशकल्लकीभोजी वृन्ताकफलमात्रभोज्यहोरात्रेण शुद्ध्यति। गवयानामहोरात्रं त्रिसंध्यस्नानं च। क्व राम०
चिद्विशेषमाह विष्णुः। हत्वा तुरंगं हत्वा महिषोष्ट्रौ कपिं तथा। एषु सर्वेषु कुर्वीत सत्रिरात्रमभोजनं। इदमभ्यासविष १५
यमत्र तु माधवीये कश्यपः। ग्राममहिषवराहकुंजरगंडशरभतरक्षुवानरसिंहव्याघ्राटमभशरटशाटशल्यकादी
नाममेषां च वधे अहोरात्रोषितः प्रीणाति तेषु घृतं दद्यात्।। ।।इति हिंसाप्रकरणं।। इन्धनार्थं द्रुमच्छेदे तु गायत्र्यादीनां

अचाशतंतमर्थं। इदन्तु सफलेषु नैतेषु वृषतेषु। अफलेषु तु दृष्टे वष्टेदनेगा अनुगामतोरमेकाहं पिबेत्। श्मसामसीमासुरा
लयपुराणस्थानदहनछेदने द्विगुणो दण्डः। पुंश्चली वानरस्त्रगालखरैर्दष्टस्तु हिता वा या गायामं कृत्वा घृतं पाश्य विशुध्यति
सवतातु शुनादष्टस्त्रिरात्रमुपवसेत्। अतः शेषं पञ्चसहृते न पावकेन समापपेत्। रजस्वला तु श्वजंबुकरासभैर्दष्टा पंचरात्रं
निराहारा पंचगव्येन शुद्धा भवति। ऊर्ध्वं तु द्विगुणं नाभेर्वस्त्रिगुणं तथा चतुर्गुणं स्मृतं मूर्ध्नि दष्टे मत्रा स्तु तिभविन। अमत्रजे
स्वलावस्थाभावे। शुना घ्रातस्य करजेष्वजनतस्य अद्भिः प्रक्षालनमग्नितापनं। पदिजुव्रा स्वणस्य श्वादिदंशोन दशस्याद्दित
तेन वा छमपउस्य घेते तदा या मूत्रपुरीषरणत्रिसंध्यास्नाने त्रिरात्रं पंचगव्याशनं च कुर्यात्। नाभेरूर्ध्वं व्रणे षड्रात्रं शिरसि। प्राजा
पत्यं। श्वादिदंशव्रणे अत्माप श्रितात्वांतरमिदं तत्त्रियादि षिदमपि प्रतिवर्णोपादहासेन वोध्यां स्त्रीप्रसंगामनन्तरेण हृदारे
तो विसर्गः कामकृते गर्हस्य स्वप्ने घरेत दस्मादिमां द्याम्पोऽभः स्यात्मनान्तरम्मम ध्यस्पर्शः किं मत्कृते गुणायत्रमाः सहस्रं जपेः
प्राणायामत्रयं च कामनपासीय छायाजां जले तेज इति मंत्रं जपेत्। अशुचिद्रव्यस्पर्शने ऽस्नातवचने सावित्रीजापः। अकामकृ

मि० १६ 16 तेनाचमनमात्रं सर्वत्र। जलाभावे तु हस्ते निष्ठीविते चैव रक्तम्लिष्टे तथान्ते पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत्। नास्ति
कस्तु द्वादशरात्रं कृच्छ्रमतप्तकृच्छ्रं तस्माद्विरमेत्। यदा तु अभ्यासं करोति तदा नास्तिकः कूटव्यवहारी मिथ्याभिशंसी सेतेषु पञ्चसंवत्स
रब्रह्मणा गोहमे संधरेषुः ब्रह्मचारी तु पोषितसंग्रामपश्चालंभनेन निरितिर्दैवमेन शुध्येत्। तत्र त्रिषवणस्नानमेककालभोजनं
चरेच्छ्वश्वां यस्तु प्रव्रजितो भूत्वा पुनः सेवेत मैथुनं षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः। तत्र ब्राह्मणस्य षाण्मासिकः कृच्छ्रः
तत्रियस्य चान्द्रायणान्तरं। वैश्यस्य कृच्छ्रं। ब्रह्मसूत्रं विनाभुङ्क्ते विण्मूत्रं कुरुते यदा गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति।
यस्य शिष्यो गुरुणा चोरव्याघ्रादिभयाकुलप्रदेशे प्रेषितस्तत्र च मृतः स गुरुः प्राजापत्यत्रयं कुर्यात्।। शिष्यस्तु गुरुद्वेषं कृत्वा गु
रुं प्रसाद्य शुध्यति। यस्तु महापापी यथाभ्यां परमभिशंसेत्सोऽब्भक्षो मासमासीत पापमुमिथ्याभिशंसकस्य कृच्छ्रं प्राजापत्यं च रा०
रेत्। ज्येष्ठस्य कनिष्ठस्य वा भार्यां यो गच्छति स चान्द्रायणं कुर्यात्। कामकारे तु संवत्सरमेतं चरेत्। यः स्वभार्यां रजस्वलां गच्छति मतत्रि १६
रात्रमुपोष्य घृतं प्राश्य विशुध्यति। तत्रैवाभ्यासे त्रिरात्रं। अत एव हि हस्तसंवर्त्तः।। रजस्वलां तु यो गच्छेत् पतितां गर्भिणीं स्त्रियां। तस्य पाप

विशुद्ध्यर्थमेतत्कृच्छ्रं विशोधनमिति । रजस्वलास्पर्शे स्नानं । रजस्वले परस्परसंस्पर्शे स्नानं पतितान्त्यश्वपाकेहत स्पृष्टा
रजस्वला प्रथमेह्नि त्रिरात्रं द्वितीयेह्नि द्विरात्रं तृतीयेह्न्येकरात्रं परतो नक्तं कुर्वीत । परतस्तु ग्रामकुक्कुटश्वभिः स्पृष्टा यावच्चन्द्रदर्शने
निराभवेत् । भुंजाना चेदेभिः स्पृष्टा तदा गोमूत्रयावकाहारा षड्रात्रेण शुद्ध्यति । अशक्तौ तु विप्रेभ्यः काञ्चनं दद्यात् । सुतविक्रये तप्त
कृच्छ्रं । कन्याया विक्रये सांतपनं कृच्छ्रं । रहस्यमापद्यकामतः कामतस्तु नारीविक्रयं कृत्वा चरेच्चान्द्रायणव्रतं । द्विजस्त्रीपण्यसेवव्रतमा
ऽर्मेनैषिणा इति तत्र पं । परोधाय शूद्रवर्णास्वकामतोयः प्रवर्त्तते सिहार्थं यसंगाद्यत्तस्य कृच्छ्रं विशोधनमिति क्षेपं । पतितचाण्डाला
दिश्रोत्रसंनिधाने पठिते श्रुतिस्मृत्यादौ त्रिरात्रमनशनं । पराजकस्माद्दूषपतितमांसं विक्रीणीते न तदा स्वं कृच्छ्रं चरेत् । तत्त्रिपर्वे स्प
योमानि लोमेन दूषणोपंवृतपस्या शुद्धिः । शूद्रस्य तु वधः । आत्मार्थं पाकारंभे मद्यपस्त्रीनिषेवणे च मासं यवान्पिबेत् । पितृमा
त्रादिहिंसा गोत्रे मासिकं मानवं । स्त्रीप्राणिवधवशीकरणादिभिर्जीवनेपि पयापयस्याप्राग्जुक्तं । अनृतवाक् तस्करो राजभृत्यः ॥
श्वंहतिरग्निहोत्ररहितः स्वाज्ञारोहणाहन्ता रंगोपजीवी शूद्रोपाध्यायो वृषलीपतिर्न नक्षत्रोपजीवी चिकित्सको देवलकः पुरोहितश्चैते

मि० १७

17

तेंचतुर्थकालाशनाः स्त्रीयमर्द्धइत्यमपागितः संवत्सरंत्रिषवनस्नायिनः शुद्धाभवेयुः। हीनवर्णेषूपपातकसामान्यप्रायश्चित्तमेव।
मित्रभेदंतुकुर्वन्नहोरात्रमनश्नन्नुत्वायवः पिबेत्। पराकंकृत्वासेव्यप्रतिग्रहंकरोतितिलसिद्धमम्बमतिग्रहंकरोतिसिमापिमासंयपोष्णतोयाय
त्रीजपेन्निरतः शुद्ध्येत्।। इत्युपपातकप्रायश्चित्तप्रकरणं।। ।।कामतः स्त्रकृत्तेतपलोडुभर्तरोवांड्रायणमभ्यासेतुगुणपानसम
न्वमहितं। अकामतः सकृद्भक्षणे सान्तपनं। तत्राभ्यासेपतिचान्द्रायणं। कृष्णसर्षपशाकंतंडुलीयकंशिग्रुनालिकांचक्षुत्काङ्कांश्च
पणंकुर्यात्। नीसाम्बकामतोपिसकृद्भक्षणेवाचान्द्रायणं। कामतोभ्यासेतत्सेवाह्यति:। लशुनगृञ्जनभक्षणेलरेकसाध्यव्या
धुपशमार्थंसावित्र्यष्टसहस्रजपः। चान्द्रायणस्यकपादाभ्यासोनंवल्लूरमेववा मत्स्याश्चकामतोऽभ्यासेपवासस्त्र्यहंक्षिपेत्।
अकामतस्तुशेषेषूपवसेदहः इतिइष्टमा। क्रव्यादिद्विरशूकरोष्ट्राणांकुक्कुटानांचभक्षणेनरकाकखराश्वानांतप्तकृच्छ्रंविशोधनं राम० ९
वृटाठैकशफानांचकाककुक्कटपोतस्यथा। मांसमूत्रपुरीषाणिप्राश्यग्रामसंमेवचश्वगोमायुकपीनांचतप्तकृच्छ्रंविशोधनं।
कामतोभ्यासेषण्मासान्। नरवकेशरुधिरभक्षणेज्ञानान्निरात्रमुपवासः। भस्मनात्रप्रवेशेतुह्यहमग्राशमशुद्धि।। पिपीलि

काकीटादिप्राशने गोमूत्रगोमयपाहारः स्त्रिरात्रेण शुध्यति। अनिर्दशाया गोर्दोहपाने षिवत्सायाश्चानागोमहिष्याश्चातिरि
क्तायाः त्रिरात्रमुपवासः। अभक्ष्यभक्षणे तु तप्तकृच्छ्रं। तत्रिपञ्चाप्यपि हृत्तस्यैव विशेषः शूद्रो यद्यपि पुनः॥ पषिवेलपिलासोरंजतो सोमस
स्य प्राप्रकृत। विडालकाकाखूच्छिष्टं। श्वाश्वनकुलस्य चके शकीरावपन्नं नापिवेद्ब्रह्मसोमसुवर्चला। एकएव त्रिमिंह। कामतो स्तुह
च्छ्रपादः। शुनश्छिष्टभोजने मासमेकं व्रतं। काकोच्छिष्टावाघ्रातेवपक्षं। शूद्रोच्छिष्टभोजने तु समरात्रं पंचगव्यं। भुक्त्वास
ह व्रात्यस्त्रीगमनं प्राजापत्येन शुध्यति। भ्रूमजा सह भुक्त्वान्नं तप्तकृच्छ्रेण शुध्यति। विशेषेन सह भुक्त्वान्नं मतिकृच्छ्रेण शुध्यति। शू
द्रेण सह भुक्त्वान्नं चान्द्रायणमथाचरेत्॥ एतच्च पित्रादिव्यतिरिक्तविषयं। पितुर्ज्येष्ठस्य च भ्रातुः कं ह उच्छिष्टं भोज्यमिति स्मर
णात् स्त्रीजातमुच्छिष्टभोजने सप्तरात्रमभोजनं। विवाहादौ तु न दोषः। अभोज्योच्छिष्टभोजने तु चान्द्रायणं कृच्छ्रं। तदर्द्धं क्रमात् वर्णत्रय
स्य भवति। आपत्काले तु द्विपेराशयद्गृहे भुक्ते मनस्तापेन शुध्यति। शेषोच्छिष्टोपपत्ते लंघनं त्रिरात्रं पाहतं। एतत् अभ्यं गावेवप
च्छिष्टं भुक्त्वा नक्तेन शुध्यति। पीतशेषं तु पक्तिं चित्तभाजने मुखनिःसृतं। अभोज्यं तद्द्विजस्तोमर्सका चान्द्रायणं चरेत्॥ इदमधा

पीतोच्छिष्टंतुपानीयंपीत्वातुब्राह्मणः कृच्छ्रत्रिरात्रंतुव्रतंकुर्याद्वामहस्तेनवापुनः। इदंस्नानंततोऽज्ञानंततस्त्वदं। स्नाघस्मिवर्मेसद
मि० ष्टेनीलीलाक्षोपघातितो। अस्निवर्मोदिमिस्त्रष्टेषुत्तेनुउपवसेदहः॥ धूतामावेक्षितेपस्मिलीठपर्द्धपितेतथा॥ हृयापञ्चेव
१८ राहेराणघाजेषुत्ते त्वकामतः। उपवासःपकृत्तेऽमामयाहकृस्यपारकं। चंडालहस्तविकलत्रसलाकुनखिकुष्टिसंस्पृष्टा
18 निकृष्ट्। अकामतःस्वर्दपत्रचभोजनेशुद्धउपस्थयोत। पत्रवाकुत्सनपूर्वकंमन्त्रंदद्युः तत्राहोरात्रे। उच्छिष्टपंक्तिभो
जनेप्येवं। वामहस्तमुक्तपात्रभोजनेमुक्तभोजनेवसांतपनो शवासंस्पृष्टे। जुहूपेजुउद्रकपाकनेब्राह्मणास्त्रमहमुपवासः
राजमसघ्नहे। एकाहवैश्यस्यशूद्रस्यनक्तं। सर्वेषांपंचगव्यपानंवा। शवोपत्रभवेच्छन्नत्मिन्नोपिचोघवाभवेत्। शुद्धे
चांद्रायणंकुर्यात्तप्तकृच्छ्रमथापिवा॥ यदिकश्चिद्द्विजोत्तमः॥ जयांस्त्रिषवणस्नायीअहोरा राम०
त्रेणशुध्यति। इदंचमानुषेशवेत्रमत्रत्रिरात्रं। चांडालकूपेषुगतंपरिकश्चिज्जलंपिवेत्। चेत्सांतपनोविप्रःप्राजाप १८
त्यंक्षत्रियः। तदर्द्धंतुचरेद्वैश्यः शूद्रेपादंविनिर्दिशेत्। अकामतस्तुब्राह्मणानांदीनांत्र्यहंत्र्यहमेकाहमुपवासो

नक्तं चैव यथायथं । चाण्डालसंबंधजलाशयेषु तु कूपवत् । म्लेच्छादीनां पुष्करिण्यादिषु तु जलं जातं दग्धं शुभं । ततो मूत्रमशुचिः त
स्नानकामा द्विजो रण्यं म्लेच्छकामान्नकं रजकादिभाण्डस्थजलपाने तु वमनं कोटीरंहैतेल पीत्वा ब्रह्मकूर्चोपवासेन द्विजो तेन शुद्
ध्येद्दानोपवासाभ्यां शुद्धिः । मद्यजलपाने पंचगव्यपानो वा दुष्टभावदुष्टभावदुष्टभोजने तु त्रिरात्रेण शुद्धिः । अज्ञानात्
भक्तं पर्युषितमशुचौ तत्रापि त्रिरात्रं । स्त्रियास्थितः स्त्रीञ्जेः पात्रे शंखशुक्तिकपर्दकैः ॥ पीत्वा नवोदकं चैव पंचगव्येन शु
ध्यति । रजस्वला कामतः कामतस्तूपवासः ॥ नवोदकस्य काले ह शरात्रे पानमनुचितं । ग्रहणकाले नारी प्रथमप्रसूता भ्रंश्या
मृत्युवत्कान्नस्य च भोजने चान्द्रायणं । धाना दधि च शक्तुं श्रीकामो वर्जयेन्निशि भोजनं तिलसंबद्धं स्नानं चैव विच
क्षणं ॥ तत्र प्राणायामशतं । शुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः ॥ तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः ।
तत्राकामतः अर्द्धः उपवासः कामतस्सहस्रामलादिफलपत्रकाञ्जिकापानेन दोषः । उच्छिष्टस्नेहपिण्याकादिभोज
ने च दर्शनं च तस्याशनं च । ह्रयां किंचिद्विहानमं तेन भोजन उपवासः । हस्तदत्तभोजने ब्राह्मणस्य समीपभोजने दुष्टपंक्तिभो

प्रा० जपनैः स्पृष्टमूत्रपुरीषकारोऽमृतसूतकशूद्रान्नभोजने शूद्रसहस्रमेत्रिरात्रमुपवासः ॥ भुंक्तेचेत्पार्वणश्राद्धे प्राणायामान
१९ षडाचरेत् ॥ उपवासस्त्रिमासांस्तु त्सरांतः प्रकीर्तितः ॥ अहमेकादशाहे तु लघुस्थिमसंचयने तथा ॥ प्राजापत्यं नवश्राद्धे चाहो
19 नं वा घमासिके ॥ पादोनं कृच्छ्रमुद्दिष्टं षण्मासे वत्सराब्दिकं ॥ ग्रहणान्नं गणिकान्नं चापि दुष्टा वज्रसितं ॥ सेनयायन
योम्यान्नं तन्नोवार्धुषिकस्य च ॥ दीक्षितस्य कदर्यस्य बद्धस्य निगडैरपि ॥ अभिशस्तस्य षंडस्य पुंश्चल्या दांभिकस्य च ॥ द्विषद
न्नं नगरघ्नान्नं पतितान्नमवक्षुतं शैलूषतंतुवायान्नं कृतघ्नस्यान्नमेव च ॥ सुवर्णकर्तृवेणस्य शस्त्रविक्रयिणस्तथा ॥ र
जकस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥ मृष्यति ये चोपपतिं स्त्रीजितानां च सर्वशः ॥ पित्रा विवदमानस्य सोमविक्रयिणस्त
था ॥ मत्याज्ञाध्याचरेत्कृच्छ्रमसमत्यात्तु त्रिरात्रकं ॥ यस्तु बलात्कारेण म्लेच्छादिभिर्भोजनं गोवधं वा कारितः स च प्राजापत्यं राम०
संवत्सरोषितेऽपक्वः ॥ संवत्सरादूर्ध्वं द्व्यग्रपादिना ॥ त्रिभिः संवत्सरैस्तत्समो भवति ॥ अमृतस्यान्नं भुक्त्वा द्विनेकं ॥ ॥ इतिश्री १९
भक्ष्याभक्ष्यप्रकरणं ॥ ॥ जातिभ्रंशकरं तु कर्म कृत्वा संकरीकरणे चांद्रमलिनकरणे तप्तः ॥ अथ प्रकीर्णकं ॥ खरजानारो

हणेनग्नस्नानेदिवास्त्र्यभिगमनेस्नानप्राणायामाभ्यांशुद्धिः अकामतःस्नानमात्रं।साक्षात्खराद्यारोहणेद्विगुणं।अन
डुहारोहणेप्राजापत्यत्रयं।अज्ञानादृधीमुरुहुंकृत्यहुंकृत्यविप्रंनिर्जित्यवादतः॥ बद्ध्वावावाससाक्षिप्रंप्रसाद्योपवसेद्दि
नं॥अभ्यासेत्रिरात्रं।विप्रस्यजिघांसयादंडोद्यमेकृच्छ्रं।घातनेऽतिकृच्छ्रं।असृक्पातेकृच्छ्रातिकृच्छ्रः।अभ्यंतरशोणितेतप्तकृच्छ्रमे
देवकृच्छ्रः।अस्थिभेदेवकृच्छ्रः।स्वांगंकृत्तेनपराकः।पादस्पर्शेदिवसोपोषणंप्रसादनंच॥विनाग्निर्मूत्रपुरीषेकृत्वासचैलस्ना
नं॥पंचमहायज्ञाननिर्वर्त्ययोभुंक्तेसकृच्छ्रार्द्धेनशुध्यति।ऋतौभार्यानभिगमनेकृच्छ्रार्द्धं।स्वभार्यापरदारागमेतिनरोवदेत्तदा
यथायथंप्राजापत्यांनवरात्रं षड्रात्रंत्रिरात्रंभवति।वर्णानांअस्नानभोजनेऽहोरात्रं।एकपंक्त्युपविष्टानांवैषम्यदानेप्राजा
पत्यं।नद्युदकमार्गसंक्रमरोधनेकृच्छ्राविकृतेपूज्यादिस्थलस्यसमस्यविषमीकरणेभेस्थलवेनामेनचांद्रायणं।इंद्र
चापस्यान्यस्यप्रदर्शनेअहोरात्रं।म्लेच्छादिसंभाषणेतुत्र्यांस्नात्वासंभाषणेपिवतोमेहतमेवभुंजनोनप्रतीत्तिनः॥प्राणा
यामत्रिकंषड्कं।नक्तंचत्रितपंचकमात्र।।उच्छिष्टस्यापरस्यानविनोत्स्यानेसद्यःस्नानंद्योत्सर्गेएकरात्रंराजापवसेत्त्रिरात्रंपुरोहि

तो दंडभरं दंडनेराजा त्रिरात्रं पुरोहितः कृच्छ्रं। अयोग्येपपात्रे भोजने। अहोरात्रव्रतं पंचगव्याशने चान्नीलीरक्तवस्त्रादिधा
मि० २० रणे पितृश्राद्धे शौमकूपे नीलीरसप्रवेशे कृच्छ्रं नीलीदारुहताडने नरुधिरस्रावे चान्द्रायणं स्त्रीधृता तु नीलीस्पर्शे च शयनादौ न
20 दुष्टा केवलपट्टसूत्रे च नीली न दुष्टा। ब्रह्मतरुनिर्मितपद्मासनपादुकारोहणे त्रिरात्रव्रतं॥ हो विप्रो ब्राह्मणाग्नौ वा दंप॥
तो गो द्विजो न मो॥ अन्तरेण यदा गच्छेत् कृच्छ्रं सान्तपनं चरेत्॥ दुःस्वप्नारिष्टदर्शने नाशे घृतसुवर्णदानं। सिंधुसौवीरसौरा
ष्ट्रान्तथा प्रत्यन्तवासिनः॥ अंगवंगकलिंगांश्च गत्वा संस्कारमर्हति॥ इदं च तीर्थयात्राव्यतिरेकेण। यस्मादित्यं न मेहे
त न पश्येदात्मनः शाहृत॥ दृष्ट्वा सूर्यं निरीक्षेत ब्राह्मणानामथापि वा॥ पादप्रतापमग्नौ कृत्वा कुशैः काशैश्च पादौ प्र एम० २०
मृज्य दिनमेकं व्रतं। क्षत्रियाद्यभिवादने एकद्वित्रिरात्रमुपवासः। सप्पारूढपादुको यानदासेषितपादो छिद्रान्धकारस्थश्च
कलत्रजपदेवपूजाभिवादनेषु समित्पुष्पकुशांबुधारणे क्षतपारणाभिगादने समन्त्रनिमंत्रितो मन्त्रभोजने च त्रिरात्रमुपवासः॥ ॥
इति प्रकीर्णकप्रायश्चित्तं॥ ॥ इदं सर्वपापप्रायश्चित्तं देशकालाद्यपेक्षया भिधेयांतथा हि। उदवासं महाप्रसमां पंस्थानां चयोधिकं न

नामुपवासोत्यंतमनुचितइतिविभाव्येवेदंसर्ववरन्पुराणभाक्भवति।यस्तुपतगायोप्रायश्चित्तंनानुतिष्ठतोत्तदाप्
र्णोघटस्फोटीतियोग्रामाद्बहिर्नीत्वा दासपातसैदापयेत्स्ववततः प्रभृतितेनसंभाषणादिकंकुर्यात्।।प्रायश्चित्तंकृत्वाऽऽ
गतोगोभ्योपवसंस्वाल्कृतं दद्याघ्रदितान्सागरह्वोपुः न्हदायुनमस्कार्यः।। ।।गोतीगी इतिप्रकाशप्रायश्चित्तं।। ।।कुर्यात
।।अतैवमतं चेसवमर्षणंत्रिरात्रंजपेजलस्थापपश्चिनोंगावदत्वाब्रह्महाशुध्येत्।श्रोत्रियादिवधेतुत्रिवेदसंहितांपाग
एप अभ्यासेनानिर्गुणोनुहन्येग्रामात्प्राचीउदीचींवानिष्क्रम्याभिप्रज्वालसाष्टसहस्रंचमर्षणंनशुध्यति।। ।।इतिब्रह्म
हत्याप्रायश्चित्तं।। ।।अथसुरापानप्रायश्चित्तं।। यद्वारेवेलेऽनभिसाभितयेकूष्माण्डीभिर्घृत्वाविंशतहुत्वाऽतोजुहुपा
र।तरशक्तस्त्रिरात्रमुपवासः।। ।।इतिसुरापानप्रायश्चित्तं।। ।।अथसुवर्णस्तेयप्रायश्चित्तमाह।एकादशरुद्रत्नोनमस्तारु
द्रस्त्रमेवइत्यवरुद्रमाद्दिारुद्रयापीत्रिरात्रोपोषितोजलेवसन्शुध्यति।सुवर्णमनपरिमाणायहारेयज्ञायतोहूमुपेसारिपह्व
सैवपाठेनशुद्धिः।। ।।इतिसुवर्णस्तेयं।। ।।अथगुरुतल्पप्रायश्चित्तमाह।।चत्वारिंशत्सहस्रासहस्रशीर्षजापीत्रिरात्रोपोषि

मिः २१ २१

तेषां गां ज्ञैकां दत्त्वा शुध्यति। इति गुरुतल्पप्रायश्चित्तम्॥ ॥गोवधाद्युपपातकेषु प्राणायामानां शतं तावता शुद्धिः। वृद्धिह्रा
सयोर्वृद्धिह्रासकल्पना। अज्ञानकृते तु प्रकीर्णके विशेषः। निशायां वा दिवा वापि यदज्ञानकृतं भवेत्। त्रैकाल्यसंध्याकरणा
त्तत्सर्वं विप्रणश्यति। अनृतं मद्यगन्धं च दिवामैथुनमेव च॥ पुनाति वृषलान्नं च संध्या बहिरुपासिता॥ गायत्रीमधिकृत्य
शंखः। शतं जप्त्वा तु सा देवी सर्वपापप्रणाशिनी॥ सहस्रं जप्त्वा तथा पातकेभ्यः प्रमोचति। दशसाहस्रजाप्येन सर्वकल्म
षनाशिनी॥ लक्षं जप्त्वा तु सा देवी महापातकनाशिनी॥ सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः॥ सुरापश्च विशुध्यन्ति ल
क्षजाप्यान्न संशयः॥ पवित्रं वा स्नानं पापं प्रसतेन तत्र होमस्तिलैः कर्तव्यः॥ गायत्र्या लक्षहोमेन मुच्यते सर्वपातकैः। उपपा
तकेषु पादह्रासात्सहस्रपादमविदुषां द्विजानां स्त्रीशूद्रयोः ... द्वेपाश्वाहक्ष्माजिनेति लाजकृता हिरण्यमधयोपषा। ददाति यस्तु वि
प्राय सर्वं जरति दुष्कृतं॥ तिलधेनुं च यो दद्यात्संयतात्मा द्विजातये। ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः। किंच क्षीराब्धौ श
यपर्यंके त्वाषाढ्यां संविशेद्धरिः॥ निद्रां त्यजति कार्त्तिक्यां तयोः संपूजयेद्धरिं॥ ब्रह्महत्यादिकं पापं क्षिप्रमेव व्यपोहति॥ तिला

प्रा· २१

न ददाति पयः प्रातः तिलान्स्पृशति खादति॥ तिलैः स्नाति मेजुहुस्सर्वं तरति दुःकृतं॥ इदं स कामा कामपो महतः सम्प्रासे वपयाव
मि० २२ २२ वसांपंयोस्तं॥ अविचावेदाभ्यासरतं सातं महापातकत्रिनापरं॥ नस्पृशंतीह पापानि महापातकजान्यपि॥ इदं स कामवि
षपोऽत एव वशिष्टः यथकार्पशतं सामंशतं वेदस्वधार्यते॥ सर्वं ततस्मवेदाग्नि दहत्याग्निरिवेंधनमिति॥ असद्यानवे
स्वलमाश्रिसयापृकमेयतिर्भवेत॥ अज्ञानाच प्रमादाद्वा वृश्वतेकर्मनेतरां॥ ओं इन्दूहं दाववनेपत्नरितमनुभवनताववा
डंवराशिगोपासुल्लसल्लोवनाक्ते सनभरनमितेः गोपकन्यासमूहैः॥ राशोल्लासप्रकाशे विद्यातत्रहपतिश्रीतरंगोमिः परी
तोगोविंदकुर्वतां पांगुणानिधिरखिलं यथपाठिप्रशोत्रो॥ २॥ ॥ इति श्रीमत्सद्वाक्यप्रमाणाञ्जपाराववीराणधरीरा
कुरूपबालदेशीयमहारण्यकुलोद्भवत्रिपाठिशिवरामान्नजत्रिपाठिकाशीरामतन्नूजनेत्रिपाठिवालेकृष्ण स्वहस्त एम० २२
तोगराममजपाप्रायश्चित्तप्रकरणं समाप्तम्॥ ॥ शुभमस्तु॥ श्रीसंवत १८२७ मी॰ अगनेकृष्णपक्षे द्वितो
पारविवासरे॥ ॥ ॥ ॥

गुणमंजरी । प्रायश्चित प्रकरण
22 पत्राणि

२२

गुणमंजरीप्रायश्चित्तप्रकरण २२